This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
सटीकईशावास्यो पनिषभाष्य	शिव नारायण	वेदांग	पूर्ण	-	6/12	13	संस्कृत	कागद	19	52		

M - 2870

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीकृष्णानंदरामसमर्थ "श्रीक्षेत्रवाराणसि" देणार" भगवद्भक्त शिवनारायण काशिस्थ मिति भाद्रपद वद्य ५ शाके १८१५

नंबर २४

॥ अथसटीकईशावास्योपनिषद्भाष्यप्रारम्भः॥

२०।२८।१९२८ धो।धो।धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई. चन्दनागर्वादेरुदकादिसम्बन्धादार्द्रीभावादिनाजातंयद्दौर्गन्ध्यमौपाधिकंमिथ्यातद्यथातत्स्वरूपनिघर्षणाभिव्यक्तेनस्वाभाविकेनगन्धेनाच्छाद्यतेतद्वद्विचारादेःस्वरू भा.
उ. पसङ्गावान्मिथ्याबुद्धेर्बाधकत्वंसम्भवतीत्याह।तद्वदेवहीति॥स्वभावोऽनादिरविद्यातत्कार्य्यंस्वाभाविकमित्यादिबाधत्वेयोग्यत्वप्रदर्शनार्थंविशेषणम्।एवंविचारादिप्रय टी.
२ त्नवतोऽनृतदृष्टिरित्यसम्भावनामुक्त्वा युक्त्यभिज्ञस्यसर्व्वविदहंचेश्वरएवेतिभावनायामधिकृतस्ययुक्तिकुशलस्यचविचारेऽधिकृतस्यसर्व्वकर्मसन्न्यासएवाधिकारइ
हमन्त्रेविवक्षितस्तेनत्यक्तेनेत्यत्रत्यागपरामर्शना तत्यजतेवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदमित्यन्यत्राप्युक्तत्वात्पुत्राद्येषणायाश्चित्तविक्षेपहेतुत्वेनप्रसिद्धत्वाच्चेत्यभि
प्रेत्याह।एवमीश्वरात्मेति॥चिकीर्षितंसन्न्यासंस्तौति।तेनत्यक्तेनेति॥त्यागेनात्मारक्षितःस्यान्निष्क्रियात्मस्वरूपावस्थानानुकूलत्वात्त्यागस्येत्यर्थः।सन्न्यासिनःशरीरसन्धा

जगद्द्वैतरूपंपृथिव्यांजगत्यामित्युपलक्षणार्थत्वात्सर्वमेवनामरूपकर्म्माख्यंविकारजातंपरमार्थसत्यात्मभावनयात्यक्तंस्यात्।एवमीश्वरात्मभावनया
युक्तस्यपुत्राद्येषणात्रयसन्न्यासएवाधिकारोनकर्म्मसुतेनत्यक्तेनत्यागेनेत्यर्थः।नहित्यक्तोमृतःपुत्रोभृत्योवाआत्मसम्बन्धितयाऽभावादात्मानंपालयत्य
तस्त्यागेनेत्ययमेवार्थः।भुंजीथाःपालयेथाः।एवंत्यक्तैषणस्त्वंमागृधःगृधिमाकाङ्क्षांमाकार्षीर्धनविषयाम्।कस्यस्वित्कस्यचित्परस्यस्वधनंस्वस्यवाधनंमाकाङ्क्षी
रित्यर्थः।स्विदित्यनर्थकोनिपातः।अथवामागृधःकस्मात्।कस्यस्विद्धनमित्याक्षेपार्थोनकस्यचिद्धनमस्तियद्गृध्येत।आत्मैवसर्व्वमितीश्वरभावनया

तेनत्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम्॥१॥कुर्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः।

सर्वंत्यक्तमतआत्मनएवेदंसर्व्वमात्मैवचसर्व्वमतोमिथ्याविषयांगृधिंमाकार्षीरित्यर्थः॥१॥एवमात्मविदःपुत्राद्येषणात्रयसन्न्यासेनात्मज्ञाननिष्ठत
यात्मारक्षितव्यइत्येषवेदार्थः।अथेतरस्यानात्मज्ञतयात्मग्रहणाशक्तस्येदमुपदिशतिमन्त्रः।कुर्वन्नेवइहनिर्वर्त्तयन्नेवकर्म्माण्यग्निहोत्रादीनिजिजीवि
षेज्जीवितुमिच्छेच्छतंशतसङ्ख्याकाःसमाःसंवत्सरान्।तावद्धिपुरुषस्यपरमायुरुचितम्।यथाप्राप्तानुवादेनयज्जिजीविषेच्छतंवर्षाणितत्कुर्वन्ने
वकर्म्माणीत्येतद्विधीयते।एवमेवम्प्रकारेत्वयिजिजीविषतिनरेनरमात्राभिमानिनिइतएतस्मादग्निहोत्रादीनिकर्म्माणिकुर्व्वन्तोवर्त्तमानात्प्रकारादन्यथा
प्रकारान्तरंनास्तियेनप्रकारेणाशुभंकर्म्मनलिप्यतेकर्म्मणानलिप्यसइत्यर्थः।अतःशास्त्रविहितानिकर्म्माण्यग्निहोत्रादीनिकुर्व्वन्नेवजिजीविषेत्। ॥ ॥

रणोपयुक्तकौपीनाच्छादनभिक्षाशनादिव्यतिरिक्तेऽपिकस्यचिद्द्रव्यपरिग्रहेरागद्वेषावापद्येतांतन्निरोधेयत्नःकर्त्तव्यः॥तस्यप्रधानविरोधित्वादित्यभिप्रेत्यनियमविधिमाह।ए
वंत्यक्तैषणइति॥स्विदितिनिपातस्यसामान्यार्थत्वेऽपिकस्यस्विदितिचिन्तनार्थत्वमन्यत्रप्रसिद्धंतदिहनगृह्यतेइत्यनर्थकमित्युक्तम्।व्यवहारदृष्ट्यात्मनैवेदंसर्व्वशेषभूतंजड
स्यचित्परतन्त्रत्वादतःप्राप्तेविषयेनाकाङ्क्षाकर्त्तव्या॥१॥परमार्थस्त्वात्मैवसर्व्वमित्याकाङ्क्षाविषयएवनास्तीत्यर्थः।आद्यमन्त्रस्यपूर्व्वार्द्धेनतत्त्वोपदेशःकृतस्तृतीयपादेनापरि राम
पक्वज्ञानस्यसन्न्यासविधिरुक्तश्चतुर्थपादेनसन्न्यासिनोनियमविधिरुक्तइतिप्रतिपदंव्याख्यायसङ्क्षेपार्थमनुवदत्युत्तरस्यसम्बन्धाभिधित्सया।एवमात्मविदइत्यादिना ॥ ॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्व्वमन्त्रेण ज्ञानं विहितं यस्य तस्यैवोत्तरमन्त्रेण कर्म्म विहितं ततः समुच्चयानुष्ठाने तात्पर्य्यं मन्त्रद्वयस्येकस्येकदेशीशङ्कामुद्भावयति। कथंपुनरिति॥ शुद्धब्रह्मज्ञानकर्म्मणोरे
काधिकारे विरुद्धत्वात् ऋतुगमनत्रिदण्डिधर्म्मवदस्त्वेवं तत्रापि क्रमेणैककर्तृकत्वमिति चेन्न। विशिष्टरूपभेदाद्भिन्नाधिकारत्वात्। यच्चोक्तम्। ज्ञानकर्मणोर्विहितत्वे शुद्धि
साम्याद्विरोधोऽसिद्ध इति तदसत्। ऋतुगमनत्रिदण्डिधर्म्मयोरप्यविरोधप्रसङ्गात्। तदुभयं नैकस्य विहितमिति चेत्तुल्यमेतत्प्रतिषेधात्तत्र न समुच्चय इति चेदिहापि न
कर्म्मणा न प्रजया नानुध्यायेद्बहून्छब्दानित्यादिप्रतिषेधस्तुल्यः केवलकर्म्मविषयो निषेध इति न च वाच्यं केवलपदव्यवच्छेद्याभावात् समुच्चयविधेरप्यनिश्चितत्वात्त
स्मान्न समुच्चये तात्पर्य्यं मन्त्रद्वयस्येत्याह। ज्ञानकर्म्मणोर्विरोधमिति। कर्त्तृत्वाद्यध्यासाश्रयं कर्म्म शुद्धत्वादपमृद्यत इति सम्बन्धग्रन्थे यथोक्तं सहानवस्थानलक्षणं विरो
धं किं न स्मरसि येनैकाधिकारत्वं तयोः कल्पयसीत्यर्थः॥ मन्त्रलिङ्गादपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह। इहाप्युक्तमिति॥ जिजीविषो रागिणः कर्म्म विहितं सर्व्वमीश्वर ए

कथं पुनरिदमवगम्यते। पूर्व्वेण मन्त्रेण सन्न्यासज्ञाननिष्ठतोक्ता द्वितीयेन तदशक्तस्य कर्म्मनिष्ठेत्युच्यते। ज्ञानकर्म्मणोर्विरोधं पूर्व्वं तत्वदकम्प्यं यथो
क्तं न स्मरसि किम्। इहाप्युक्तं यो हि जिजीविषेत् स कर्म्म कुर्व्वन्। ईशावास्यमिदं सर्व्वं तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमिति। न जीविते मरणे वा
गृधिं कुर्व्वीतारण्यमियादिति च। ततो न पुनरेयादिति सन्न्यासशासनात्। उभयोः फलभेदञ्च वक्ष्यति। इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रिया

एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे॥२॥ असूर्य्या नाम ते लोका अन्धेन तमसाऽऽवृताः। ॥

पथश्चैवं पुरस्तात् सन्न्यासश्च। तयोः सन्न्यास एवातिरेचयति। न्यास एवात्यरेचयदिति तैत्तिरीयके। द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिल
क्षणो धर्म्मो निवृत्तौ च विभावित इत्यादि पुत्राय विचार्य्य निश्चितमुक्तं व्यासेन वेदाचार्य्येण भगवता। विभागञ्चानयोर्दर्शयिष्यामः॥२॥ अथेदानी
मविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते। असूर्य्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषाञ्च स्वभूता असूर्य्याः। नामशब्दोऽनर्थको निपातः। ९

वेति ज्ञानवतस्त्यागो विहितः। किञ्च धनसम्पन्नस्यैव कर्मण्यधिकारः। प्रथममन्त्रार्थाधिकारिणश्च धनाकाङ्क्षानिषेधेन कर्म्माधिकारनिषेधः प्रतीयत इत्यर्थः॥ जिजीविषा
हि कर्म्माधिकारिण एव न ज्ञानाधिकारिण इत्यत्र प्रमाणमाह। न जीवित इति॥ अरण्यं स्त्रीजनासङ्कीर्णमाश्रममियाद् गच्छेदिति वेदशास्त्रनिश्चितस्ततोऽरण्यवासोपल
क्षितात् सन्न्यासविधानादित्यर्थः। इतश्चैकफलकामस्य ज्ञानकर्मणोरधिकारः प्रतिपत्तव्य इत्याह। उभयोरिति॥ को मोहः कः शोक एकत्वमनुपश्यत इति सनिदानार्थप्र
हाणं ज्ञानफलं वक्ष्यति। संसारमण्डलान्तरगतमेव देशान्तरमाप्यापन्नं हिरण्यगर्भपदप्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति। अग्ने नय सुपथेत्यन्तेनेत्यर्थः॥ नारायणोपनि
षद्वाक्यमपि भिन्नाधिकारत्वे सति प्रमाणयति। इमौ द्वावेवेति॥ पुरस्तात् सृष्टिकालेऽनुनिष्क्रान्ततरौ भूतसृष्टिमनुप्रवृत्तौ भिन्नाधिकारत्वात् द्वौ। तयोः सन्न्यास एवाति
रिक्तः श्रेष्ठो भवति परमपुरुषार्थाव्यवधानादित्यर्थः॥ व्यासवाक्यमपि संवादकमाह। द्वाविमाविति॥२॥ आद्यमन्त्रार्थं प्रपञ्चयितुं प्रथममविद्वन्निन्दा क्रियत इत्याह। अथेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई श्रीगणेशाय नमः॥ ॐ परमात्मने नमः॥ वाजसनेयसंहितोपनिषद्भाष्यटीका॥ येनात्मनापरेणेशाव्याप्तं विश्वमशेषतः। सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः॥१॥ ईशावा भा
उ स्यमित्यादिमन्त्रान् व्याचिख्यासुर्भगवान्भाष्यकारस्तेषां कर्म्मशेषत्वशङ्कां तावत् व्युदस्यति। तथाहि कर्म्मजडाः केचन मन्यन्ते ईशावास्यमित्यादयो मन्त्राः कर्म्मशेषा मन्त्र टी
१ त्वाविशेषादिषेत्वादिमन्त्रवत्॥ अतः पृथक्प्रयोजनाद्यभावाद्व्याख्येया इति तान्प्रत्याह। ईशावास्यमित्यादय इति॥ कर्म्मस्वविनियुक्ता इति। इषेत्वेति शाखां छिनत्तीत्या
दिवत् विनियोजकप्रमाणादर्शनात्प्रकरणांतरत्वाच्चेत्यर्थः॥ श्रौतविनियोगाभावेऽपि बर्हिर्देवसदनं दामीत्यस्य बर्हिर्लवनप्रकाशनसामर्थ्यात् बर्हिर्लवने यथा विनियोग
स्तथा कर्म्मशेषात्मप्रकाशनसामर्थ्येन कर्मस्वेषां विनियोग इत्यपि नाशङ्कनीयमित्याह। तेषामिति॥ शुद्धत्वादिविशेषणस्यात्मनः कर्म्मशेषत्वे प्रमाणाभावात् याथात्म्यं न के
वलं कर्म्मानुपयोगि किन्तु कर्म्मणा विरुध्यत इत्याह। याथात्म्यञ्चेति॥ शुद्धोऽहं स्वभावतो न तु केनापि पाप्मना विद्धः सर्वत्रैकोऽशरीर आकाशोपम इति जानन् कटाक्षेणापि कर्म्म वी
क्षते। किन्त्वापातप्रतीपान्तरेष्वेतादृशी निरूपणाद्येव कर्म्मप्रवृत्तिमित्यर्थः। किञ्च यः कर्म्मशेषः स उत्पाद्यो दृष्टो यथा पुरोडाशादिः। विकार्य्यः सोमादिः। आप्यो मन्त्रादिः। संस्का
र्य्योऽत्रीह्यादिस्तत्तद्दुलाघातादिरूपत्वं व्यापकं व्यावर्त्तमानमात्मयाथात्म्यस्य कर्म्मशेषत्वमपि व्यावर्त्तयति। तथात्मयाथात्म्यं कर्तृभोक्तृवचनभवति। येन ममेदं समीहितसा

ॐ वाजसनेयसंहितोपनिषद्भाष्यम्॥ ईशावास्यमित्यादयो मन्त्राः कर्म्मस्वविनियुक्तास्तेषामकर्म्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्म्मणा विरुध्यत इति युक्त एवैषां कर्म्मस्वविनियोगः। न चैवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्य्यमाप्यं संस्कार्य्यं वा कर्तृभोक्तृरूपं वा येन कर्म्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्। गीतानां मोक्षधर्म्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोके कबुद्धिसिद्धकर्म्माणि विहितानि

धनं ततो मया कर्त्तव्यमित्यहङ्कारान्वयपुरःसरः कर्त्राऽन्वयः स्यादित्याह। नचैवमिति॥ ननु उपनिषदि जपोपयोगित्वाद्न्यस्य च प्रमा
णस्यादर्शनान्न निरूप्यमेव। एतादृशमात्मयाथात्म्यं तत्राह। सर्वासामिति॥ यत्परः शब्दः स शब्दार्थ इति मीमांसाप्रसिद्धेः सर्वासामुपनिषदां चैकात्म्ये तात्पर्य्यदर्श
नान्न जपोपयोगित्वमुपनिषदां शक्यं वक्तुम्। तथाहि ईशावास्यमित्युपक्रम्य स पर्य्यगाच्छुक्रमित्युपसंहारात् अनेजदेकं तदन्तरस्य सर्वस्येत्यभ्यासदर्शनान्नैनद्देवा आप्नु
वन्नित्यपूर्वता सङ्कीर्त्तनात् को मोहः कः शोक एकत्वमनुपश्यत इति फलवत्तासङ्कीर्त्तनात् कुर्वन्नेवेहेति जिजीविषोर्भेददर्शिनः कर्म्मकरणानुवादेनासूर्य्या नाम त इति नि
न्दयैक्यात्म्यदर्शनस्य स्तुतत्वात्तस्मिन्नपो मातरिश्वा दधातीत्यभिधायिन्याश्चास्यास्तावदुपनिषद ऐकात्म्यतात्पर्य्यं दृश्यते। एवमन्यासामप्युपनिषदामुपक्रमोपसंहारे
करूप्याभ्यासापूर्वताफलवत्त्वार्थवादयुक्त्युपपादनानि षट् तात्पर्य्यलिङ्गानि विकल्पेन समुच्चयेन वास्माभिस्तत्र तत्र लोके दर्शितानीति नेह प्रतन्यन्ते किञ्च प्रत्ययसंवादो
ऽपि बलवत्कारणम्। प्रसिद्धे विद्यते चोपनिषदर्थे गीतादिसंवादस्तस्मादुपनिषत्पदसमन्वयेनावगम्यमानमैकात्म्यं न प्रमाणान्तरानुपलम्भविरोधेनोपलम्भनीयम्॥ यथेन्द्रि राम
यान्तरेणानवगम्यमानमपि रूपं चक्षुषा गम्यमानं नापह्नुवते तथैकात्म्यमपि नापह्नवार्हमित्याह। गीतानामिति। समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। ॥ ॥ ॥ १

विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यतीत्यादि गीता। एक एव हि भूतात्मा सर्वभूतेष्ववस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवदित्यादि मोक्षशास्त्राणां चैका
त्म्यपरत्वादित्यर्थः॥ तद्येतादृशमात्मतत्त्वं तर्हि निरधिकारित्वात्कर्म्मकाण्डमुच्छिद्येतेत्यपि नाशङ्कनीयमित्याह। तस्मादिति॥ औपनिषदात्मयाथात्म्यं चतीव्रक्रोधा
क्रान्तस्वान्तप्रत्येवश्येनादिविधिप्रामाण्यम्। तथा मिथ्यादर्शिनं प्रत्येव कर्म्मविधिप्रामाण्यमित्यर्थः॥ अत्र जैमिनिप्रभृतीनां सम्मतिमाह। यो हीत्यादिना। अर्थित्वादियुक्त
स्य कर्म्मण्यधिकारः षष्ठे प्रतिष्ठापितः। अर्थित्वादि च मिथ्याज्ञाननिदानम्। नहि नभोवन्निष्क्रियस्य स्वत एव दुःखासंसर्गिणः परमानन्दस्वभावस्य सुखं मे स्याद्दुःखं मे माभू
दित्यर्थित्वम्। शरीरेन्द्रियसमर्थोऽहमित्यभिमानित्वं मिथ्याज्ञानं विना न सम्भवतीत्यर्थः॥ यस्मादात्मयाथात्म्यप्रकाशका मन्त्रा न कर्म्मशेषभूता न च भानान्तरविरुद्धा
स्तस्मात्प्रयोजनादिमत्त्वमपि तेषां सिद्धमित्याह। तस्मादेत इति॥ व्याख्येयत्वमुक्त्वा प्रतिपदं व्याचष्टे ईशेति॥ ईश ऐश्वर्ये। ऽस्य धातोः क्विपि लुप्ते कृदन्तरूप मीट् तस्य तृती

यो हि कर्म्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारधर्म्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्म्मस्विति ह्यधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनात्मविषयं स्वाभाविककर्म्मविज्ञानं निवर्त्तयन्तः शोकमोहादिसंसारधर्म्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्तीति। एवमुक्ताभिधेयसम्बन्धप्रयोजनान्मन्त्रान्सङ्क्षेपतो व्याख्यास्यामः॥ ईशा। ईष्टे इति ईट् तेनेशा।

ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत्।

ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्। तेन स्वेनात्मनेशा वास्यमाच्छादनीयम्। किम्। इदं सर्वं यत्किञ्च यत्किञ्चिज्जगत्यां पृथिव्यां जगत्। सर्वं स्वेनात्मनाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं परमात्मना। यथा चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं ॥ ॥

यैकवचनमीशेति॥ ननु कर्त्तरि क्विब्विधानात्परमेश्वरस्य चाक्रियत्वात्कथं क्विबन्तशब्दवाच्यतेति तत्राह। ईशनेति। मायोपाधीशनकर्तृत्वसम्भवाच्छब्दवाच्यता न विरुध्यते निरु
पाधिकस्य चलक्ष्यत्वं भविष्यतीत्यर्थः॥ ईशित्रीशितव्यभावेन तर्हि भेदः प्राप्त इत्याशङ्क्याह। सर्वजन्तूनामिति॥ यथादर्शादिषु प्रतिबिंबानामात्मा बिम्बभूतो देवदत्त ईशिताभ
वति। तथा कल्पभेदेनेशित्रीशितव्यभावसम्भवान्न वास्तवभेदानुमानं सम्भवतीत्यर्थः। वस आच्छादने। अस्य रूपं वास्यन्तत्व त ईश्वरात्मकमेव सर्वं भ्रान्त्या यदनीश्वररूपेण गृ
हीतं तत्सर्वमीश्वर एवात्मैवेति ज्ञानेनाच्छादनीयं सर्वात्मक ईश्वरोऽस्मीति ज्ञातव्या शेषतत्त्वोपदेशच्छान्दोग्ये तत्त्वमसीतिवदित्यर्थः। ब्रह्मैव सर्वमात्मैव सत्प्रकाशाविशेषतः।
हेयोपादेयभावोऽयं न सत् स्वप्नवदिष्यते।१। उक्तञ्च। न बन्धोऽस्ति न मोक्षोऽस्ति न विकल्पोऽस्ति तत्त्वतः। नित्यप्रकाश एवास्ति बिम्बाकारो महेश्वर इति॥ २॥ यस्योपदेशिकज्ञानमात्रे
णानृतदृष्टिर्न निराक्रियते तस्य विचारादिप्रयत्नेन तत्त्वप्रकाशे सत्यनृतदृष्टिस्तिरस्करिष्यत इत्यभिप्रेत्य दृष्टान्तमाह। यथेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई. उ. ३

तेलोकाइतितच्छब्दोयच्छब्दार्थे। यथाश्रुतमितियेनयेनयादृशंप्रतिषिद्धंविहितंवादेवताविज्ञानमनुष्ठितंसत्तदनुरूपामेवयोनिमाप्नोतीत्यर्थः॥ आत्महन्तृत्वस्योदरभे दिनिप्रसिद्धेःकथमविद्वांसआत्मनइत्याह। कथंतेइति॥ उदरभेदिनोध्यात्माधिकारेप्रसङ्गाभावादशुद्धत्वाध्यासेनतिरस्कारएवात्महन्तृत्वमित्याह। अविद्यादोषेणेति॥ यथाकस्यचिच्छुद्धस्यमिथ्याभिशापोशस्त्रबधउच्यतेतद्वदात्मनिपापित्वाद्यध्यासोऽपिहिंसैवेत्यर्थः॥ अजरामरत्वादिलक्षणोऽहमितिसंवेदनमभिधानन्त्वयत्कार्य्यं तदपिहतस्येवनदृश्यतइतिहननमुपचर्य्यतइत्याह। विद्यमानस्येति॥ अस्यात्मघातस्यप्रायश्चित्तविधानादर्शनात्संसरणमेवफलमित्याह। तेनहीति॥३॥ उत्तरमन्त्र

भा. टी.

तेलोकाःकर्मफलानिलोक्यन्तेदृश्यन्तेभुज्यन्तइतिजन्मानि। अन्धेनादर्शनात्मकेनाज्ञानेनतमसाऽऽवृता आच्छादितास्तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमंदेहमभिगच्छन्तियथाकर्म्मयथाश्रुतम्। येकेचात्महनः। आत्मानंघ्नन्तीतिआत्महनः। केते। येऽविद्वांसः। कथंतेआत्मानंनित्यंहिंसन्ति ।अविद्यादोषेणविद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्यात्मनोयत्कार्य्यंफलमजरामरत्वादिसंवेदनादिलक्षणंतद्धतस्येवतिरोभूतंभवती तिप्राकृताअविद्वांसोजनाआत्महनउच्यन्ते। तेनह्यात्महननदोषेणसंसरन्तिते।३॥ यस्यात्मनोहननादविद्वांसःसरन्तितद्विपर्य्ययेणविद्वांसोमु च्यन्तेतेनात्महनः। तत्कीदृशमात्मतत्त्वमित्युच्यते। अनेजत्नएजत्। एजृकम्पने। कम्पनंचलनंस्थिरत्वप्रच्युतिस्तद्वर्जितंसर्व्वदाएकरूपमित्यर्थः

तांस्तेप्रेत्याभिगच्छन्तियेकेचात्महनोजनाः॥३॥ अनेजदेकम्मनसोजवीयोनैनद्देवाआप्नुवन्पूर्व्वमर्षत्।

तच्चैकंसर्व्वभूतेषुमनसःसङ्कल्पादिलक्षणात्जवीयोजववत्तरम्। कथंविरुद्धमुच्यते। ध्रुवंनिश्चलमिदंमनसोजवीयइतिच। नैषदोषः। निरुपाध्युपा धिमत्त्वोपपत्तेः। तत्रनिरुपाधिकेनरूपेणोच्यतेअनेजदेकमिति। मनसोऽन्तःकरणस्यसङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्त्तनादिहदेहस्थस्य मनसोब्रह्मलोकादिदूरस्थसङ्कल्पनंलक्षणमात्राद्भवतीत्यतोमनोजविष्ठंलोकेप्रसिद्धम्। तस्मिन्मनसिब्रह्मलोकादीन्द्रुतंगच्छतिसतिप्रथमंप्रा प्तइवात्मचैतन्याभासोगृह्यतेऽतोमनसोजवीयइत्याह। नैनद्देवाद्योतनाद्देवाश्चक्षुरादीनीन्द्रियाणिएतत्प्रकृतमात्मतत्त्वंनाप्नुवन्नप्राप्तवन्तः। तेभ्यो मनोजवीयोमनोव्यापारव्यवहितत्वात्। आभासमात्रमप्यात्मनोनैवदेवानांविषयीभवति। यस्माज्जवनान्मनसोऽपिपूर्व्वमर्षत्पूर्व्वमेवगतम्। ॥

मवतारयति। यस्यात्मनइत्यादि॥ अविक्रियमेवञ्चेदात्मतत्त्वंकथंकेचनस्वर्गगामिनःकेचननरकगामिनइतिसांसारिकव्यवस्थास्यात्मनउपाधिनिबन्धनेत्यभिप्रेत्याह। म नसइत्यादिना॥ उपाधेरनुवर्त्तमानात्विक्रियादिव्यवहाराश्रयत्वमितिशेषः। नतुमनसोदेहान्तःस्थत्वाद्बहिर्गमनायोग्यात्कथंवेगवत्त्वमित्याशङ्क्याह। देहस्थस्ये ति॥ जवीयस्त्वादश्वादिवत्तर्हिचक्षुरादिग्राह्यत्वंप्राप्तमित्याशङ्क्याह। नैनद्देवाइति॥ चक्षुरादिप्रवृत्तेर्मनोव्यापारपूर्व्वकत्वात्तदविषयत्वेचक्षुरादिविषयत्वमप्यात्मनोनस म्भवतीत्यर्थः॥ मनसोवाकथंनविषयआत्मेत्यतआह। यस्मादिति॥ यथामनःस्थंपरिमाणंमनसोनविषयःस्यन्त्ताव्यवधानात्तथात्माप्यत्यन्ताव्यवधानान्मनसोनविषय

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तात्मसाङ्गवचनयोगोपपत्तिमाह। तस्मिन्नात्मतत्त्वेसतीति॥ श्रौतानिकर्म्माणिसोमाज्यपयःप्रभृतिभिरद्भिःसम्पाद्यन्तइतिसंबन्धाल्लाक्षणिकोऽप्शब्दःकर्म्मणस्तुप्रा
णिचेष्टायाश्चावृनिमित्तत्वप्रसिद्धेः।कारणवाचकःशब्दःकार्य्योपलक्षणयाप्रयुक्तइत्यर्थः।ईश्वरस्यापिहिरण्यगर्भस्यनियतप्रवृत्तस्यन्यथानुपपत्त्याधिष्ठातापरमेश्व

व्योमवद्व्यापित्वात्।सर्व्वव्यापितदात्मतत्त्वंसर्व्वसंसारधर्म्मवर्जितंस्वेननिरूपाधिकेनस्वरूपेणाविक्रियमेवसदुपाधिकृताःसर्व्वाःसंसारविक्रियाअनु
भवतीवाऽविवेकिनांमूढानामनेकमिवचप्रतिदेहंप्रत्यवभासतइत्येतदाह।तद्धावतोद्रुतंगच्छतोऽन्यान्मनोवागिन्द्रियप्रभृतीनात्मविलक्षणानत्य
येतिअतीत्यगच्छतीव।इवार्थंस्वयमेवदर्शयति।तिष्ठदिति।स्वयमविक्रियमेवसदित्यर्थः।तस्मिन्नात्मतत्त्वेसतिनित्यचैतन्यस्वभावेमातरिश्वा
मातरिअन्तरिक्षेश्वसतिगच्छतीतिवायुःसर्व्वप्राणभृत्क्रियात्मकोयदाश्रयाणिकार्य्यकरणजातानियस्मिन्नोतानिप्रोतानिचयत्सूत्रसंज्ञकंसर्व्व
स्यजगतोविधारयितृसमातरिश्वा।अपःकर्म्माणिप्राणिनांचेष्टालक्षणानि।अग्न्यादित्यादीनांज्वलनवहनप्रकाशाभिवर्षणादिलक्षणानिदधातिवि
भजतीत्यर्थः।धारयतीतिवा।भीषास्माद्वातःपवतइत्यादिश्रुतिभ्यः।सर्व्वाहिकार्य्यकारणादिविक्रियानित्यचैतन्यात्मस्वरूपेसर्व्वास्पदभूतेसत्येव
भवन्तीत्यर्थः॥४॥ नमन्त्राणांजामिताऽस्तीतिपूर्व्वमन्त्रोक्तमप्यर्थंपुनराह।तदात्मतत्त्वंयत्प्रकृतमेजतिचलतितदेवचनैजतिस्वतोनैवचलतिअ

तद्धावतोऽन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति॥४॥तदेजतितन्नैजतितद्दूरेतद्वन्तिके।तदन्तरस्यसर्व्वस्यतदुस
र्व्वस्यास्यबाह्यतः॥५॥यस्तुसर्व्वाणिभूतान्यात्मन्येवानुपश्यति।सर्व्वभूतेषुचात्मानंततोनविजुगुप्सते॥६॥ ॥ ॥ ॥

चलमेवसच्चलतीवेत्यर्थः।किञ्चतद्दूरेवर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूरइव।तद्वन्तिकेसमीपेऽत्यन्तमेवविदुषामात्मत्वान्नकेवलंदूरेऽन्तिकेच।त
दन्तरेऽभ्यन्तरेसर्व्वस्य।आत्मासर्व्वान्तरइतिश्रुतेः।अस्यसर्व्वस्यजगतोनामरूपक्रियात्मकस्यतदुसर्व्वस्यास्यबाह्यतोव्यापित्वादाकाशवन्निरतिशय
सूक्ष्मत्वादतःप्रज्ञानघनएवेतिशासनान्निरन्तरम्॥५॥ यस्तुपरिव्राड्मुमुक्षुःसर्व्वाणिभूतानिअव्यक्तादीनिस्थावरान्तान्यात्मन्येवानुपश्यतिआ
त्मव्यतिरिक्तानिनपश्यतीत्यर्थः।सर्व्वभूतेषुचतेष्वेवचात्मानंतेषामपिभूतानांस्वमात्मानमात्मत्वेनयथास्यकार्य्यकारणसङ्घातस्यात्माऽहंसर्व्वप्रत्य
यसाक्षिभूतश्चेताःकेवलोनिर्गुणोऽनेनैवस्वरूपेणाव्यक्तादीनांस्थावरान्तानामहमेवात्मेतिसर्व्वभूतेषुचात्मानंनिर्व्विशेषंयस्त्वनुपश्यतिसततस्तस्मादेवद
र्शनान्नविजुगुप्सतेजुगुप्सांघृणांनकरोति।प्राप्तस्यानुवादोऽयम्।सर्व्वाहिघृणात्मनोऽन्यद्दुष्टंपश्यतोभवत्यात्मानमेवात्यन्तविशुद्धंनिरन्तरंपश्यतोनघृणानि

रःसम्भाव्यतइत्युक्तमिदानींमातरिश्वग्रहणमुपलक्षणार्थमादायतात्पर्य्यमाह।सर्व्वाहीति॥४॥ जामिताआलस्यंव्यापित्वाद्बाह्यतोऽस्तिनिरतिशयसूक्ष्मत्वादन्तश्चेदस्तितर्हि
निरन्तरमेकरसंनस्यान्मानाभावादित्याशङ्क्याह।प्रज्ञानघनएवेति॥५॥उक्तात्मज्ञानस्यफलंविधिनिषेधातीतजीवन्मुक्तस्वरूपेणावस्थानमित्याह।यस्त्विति॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई
उ
४

इममेवार्थमन्योऽपिमन्त्रआह। यस्मिन्निति॥ निरतिशयानन्दः स्वतएव दुःखास्पृष्टमात्मानमजानतो भवति ह्याहतोऽहंनममपुत्रोऽस्तिनक्षेत्रमिति। ततः पुत्रादीन्काम भा·
यतेतदर्थंदेवताराधनादिचिकीर्षति तत्रात्मैकत्वंपश्यतस्ततोन्वयव्यतिरेकाभ्यांशोकादेरविद्याकार्य्यत्वावधारणान्मूलाविद्यानिवृत्त्यैवशोकादेरात्यन्तिकनिवृत्तिर्वि टी·
द्याफलत्वेनविवक्षिता॥ लयमात्रस्यसुषुप्तेऽपिभावादित्याह। शोकश्चमोहश्चेत्यादिना॥ योऽयमिति। स्नुप्रस्रवणेधातुः। स्नावयन्तिशरीरमितिस्नावाशिरा॥ ६॥ ७॥ ८॥
प्रकरणविभागंदिदर्शयिषुर्वृत्तमनुवदति। अत्राद्येनेति। यदुक्तंभास्करेणसर्वास्वप्युपनिषत्स्वेकब्रह्मविद्याप्रकरणं ततः प्रकरणभेदकरणमनुचितम्। तदसत्। प्राणाद्युपासनवि

इममेवार्थमन्योऽपिमन्त्रआह। यस्मिन्सर्वाणिभूतानि। यस्मिन्कालेयथोक्तात्मनिवातान्येवभूतानिसर्वाणिपरमार्थात्मदर्शनात् आत्मैवाभूदात्मैव
संवृत्तःपरमार्थवस्तुविजानतस्तत्रतस्मिन्कालेतत्रवात्मनिवाकःशोकःकोमोहः। शोकश्चमोहश्चकामबीजमज्ञानतोभवति। नचात्मैकत्वंविशुद्धंग
गनोपमंपश्यतःकोमोहःकःशोकइति। शोकमोहयोरविद्याकार्य्ययोराक्षेपेणासम्भवप्रदर्शनात्। सकारणस्यसंसारस्यात्यन्तमेवोच्छेदःप्रदर्शितो
भवति॥ ७॥ योऽयमतीतैर्मन्त्रैरुक्तआत्मासस्वेनरूपेणेत्याहायंमन्त्रः। सपर्य्यगात्स आत्मापर्य्यगात्परिसमन्तादगाद्गतवान् आकाशवद्व्यापीत्यर्थः
। शुक्रंशुद्धंज्योतिष्मद्दीप्तिमानित्यर्थः। अकायमशरीरोलिङ्गशरीरवर्जितइत्यर्थः। अव्रणमक्षतम्। अस्नाविरंस्नावाःशिरायस्मिन्नविद्यन्तइत्यस्नावि

यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः। तत्रकोमोहःकःशोकएकत्वमनुपश्यतः॥ ७॥ सपर्य्यगाच्छुक्रमकाय
मव्रणमस्नाविरंशुद्धमपापविद्धम्। कविर्मनीषीपरिभूःस्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यः॥ ८॥

रम्। स्नाविरमव्रणमित्याभ्यांस्थूलशरीरप्रतिषेधः। शुद्धंनिर्म्मलम्। अपापविद्धंधर्म्माधर्म्मादिपापवर्जितमिति। शुक्रमित्यादीनिवचांसिपुंल्लिङ्गत्वे
परिणेयानि। सपर्य्यगादित्युपक्रम्यकविर्मनीषीतिपुंलिङ्गत्वेनोपसंहारात्। कविःक्रान्तदर्शीसर्व्वदृक्। नान्यतोऽस्तिद्रष्टेत्यादिश्रुतेः। मनीषीमनसई
षितासर्व्वज्ञईश्वरइत्यर्थः। परिभूःसर्वेषामुपर्य्युपरिभवतीतिपरिभूः। स्वयम्भूःस्वयंभवतीतियेषामुपरिभवतियश्चोपरिभवतिससर्वःस्वयमेव
भवतीतिस्वयम्भूः। सनित्यमुक्तईश्वरोयाथातथ्यतःसर्व्वज्ञत्वाद्यथातथाभावोयाथातथ्यंयथाभूतकर्म्मफलसाधनतोऽर्थान्कर्त्तव्यपदार्थो
न्व्यदधाद्विहितवान्यथानुरूपंव्यभजदित्यर्थः। शाश्वतीभ्योनित्याभ्यःसमाभ्यःसंवत्सराख्येभ्यःप्रजापतिभ्यइत्यर्थः॥ ८॥ ॥ ॥ ॥

धानस्याप्युपनिषत्सुदर्शनात्। नचतदपिब्रह्मज्ञानाङ्गमितिवाच्यम्। पृथक्फलश्रवणात्। स्वेनापिव्याकृताव्याकृतोपासनसमुच्चयविधानस्यप्रकरणभेदेनैवेष्ट
त्वाद्व्याकृताव्याकृतोपासनस्यप्रकारान्तरत्वात्तस्माद्यथाकर्म्मकाण्डेऽग्निहोत्रादिप्रकरणंभिन्नमेवेष्यतेभिन्नाधिकारत्वात्तत्कर्मणस्तथोपनिषत्स्वपिभि
न्नाधिकारकर्माविरोधाद्विरुद्धविद्याप्रकरणभेदोनविरुद्ध्यते॥ मन्त्रार्थंब्राह्मणसम्मतिंदर्शयितुमुपक्रमतेअनयोश्चेत्यादिना॥ तत्रवाक्यमज्ञत्वमवगम्यतइ

॥ईशावा॥ ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनमवेति॥ जायामेस्यादथप्रजायेयाःथवित्तंमेस्यादथकर्म्म कुर्वीयेति कामयमानस्यब्राह्मोजायादिर्यदानसम्पद्यते तदाध्यात्मजायादिसम्पत्तिंदर्शयति। मनइत्यादि
ना। एतच्चाज्ञत्वलिङ्गं मनआदिष्वात्मत्वाभिमानस्याज्ञानकर्म्मत्वात्॥ यथावाबाह्यकामिन्यलाभेसुप्ता मनोविजृम्भितकामिनीमुपभुञ्जानोऽज्ञः प्रसिद्धस्तद्वदयमपीत्य
र्थः॥ तेषाञ्चकर्म्मणांफलंसंसारप्राप्तिरेवेत्युपदर्शितमित्याह। तथावेति॥ एवंसाधारणमन्नंयदिदमद्यतेहदेवानांहुतप्रहुतेदर्शपौर्णमासौवात्रीण्यस्यभोगसाधनानिमनोवाक्
प्राणलक्षणानिपश्वर्थमेकंपयइतिसमान्नसर्गोदर्शितः श्रुत्यायत्सप्तान्नानिमेधयातपसाजनयत्पितेत्यादिना। अत्रैकैकोयजमानएवंविहितप्रत्तिषिद्धज्ञानकर्म्मानुष्ठानात्सर्वस्य

अत्राद्येनमन्त्रेणसर्वैषणापरित्यागेनज्ञाननिष्ठोक्ताप्रथमवेदार्थः। ईशावास्य मिदंसर्वंमागृधःकस्यस्विद्धनमित्यज्ञानांजिजीविषूणांज्ञाननिष्ठासम्भ
वेकुर्वन्नेवेहकर्म्माणिजिजीविषेदितिकर्म्मनिष्ठोक्ताद्वितीयोवेदार्थः। अनयोश्चनिष्ठयोर्विभागोमन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपिदर्शितः। सोऽकामयत
जायामेस्यादित्यादिना। अज्ञस्यकामिनःकर्म्माणीतिमनएवास्यात्मावाग्जायेत्यादिवचनात्अज्ञत्वंकामित्वंचनिश्चितमवगम्यते। तथाचतत्फलंसप्तान्नस
र्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानंजायाद्येषणात्रयसन्न्यासेनचात्मविदांकर्म्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैवदर्शिता। किंप्रजयाकरिष्यामोये
षांनोऽयमात्मायंलोकइत्यादिना। येतुज्ञाननिष्ठाःसन्न्यासिनस्तेभ्योऽसूर्य्यानामतइत्यादिनाऽविद्वन्निन्दाद्वारेणात्मनोयाथात्म्यंसपर्य्यगादित्येतदन्तै
र्मन्त्रैरुपदिष्टम्। तेह्यत्राधिकृतानकामिनइति। तथाचश्वेताश्वतराणांमन्त्रोपनिषदि अत्याश्रमिभ्यःपरमंपवित्रंप्रोवाचसम्यगृषिसङ्घजुष्टमित्यादि
विभज्योक्तम्। येतुकर्म्मनिष्ठाःकर्म्मकुर्वन्तएवजिजीविषवस्तेभ्यइदमुच्यते। अंधन्तमइत्यादि। कथंपुनरेवमवगम्यतेनतुसर्वेषामित्युच्यते। अकामि
नःसाध्यसाधनभेदोपमर्द्देन। यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः। तत्रकोमोहःकःशोकएकत्वमनुपश्यतः। यदात्मैकत्वविज्ञानंतन्नकेनचित्कर्म्मणा
ज्ञानान्तरेणवाबाह्यमूढःसमुच्चिचीषति। इहत्वन्येनतुसमुच्चिचीषयाऽविद्वदादिनिन्दाक्रियते। तत्रचयस्ययेनसमुच्चयःसम्भवतिन्यायतःशास्त्रतोवानदि
ह्रोच्यते। तद्दैवंवित्तंदेवतादिज्ञानंकर्म्मसम्बन्धित्वेनोपन्यस्तंनपरमात्मज्ञानम्। विद्ययादेवलोकइतिपृथक्फलश्रवणात्। तयोर्ज्ञानकर्म्मणोरिहैकैकानुष्ठा
ननिन्दासमुच्चिचीषयानननिन्दापरैवैकैकस्यपृथक्फलश्रवणात्। विद्ययातदारोहन्ति। विद्ययादेवलोकः। नतत्रदक्षिणायान्ति। कर्म्मणापितृलोकइति।
नहिशास्त्रविहितंकिञ्चित्कर्त्तव्यतामियान्तत्र।

संसारस्यसाक्षात्पारम्पर्य्याभ्यांजनकत्वात्पितोच्यते। सृष्टेष्वेतेषुतस्यपितुरहंममेदमित्यात्मत्वाध्यासेनमनआदिष्वितरेषुचसम्बन्धाध्यासेनावस्थानंसंसारःप्रसिद्धइ
त्यर्थः॥ एवंमन्त्रप्रदर्शितेनिष्ठाद्वयेब्राह्मणसम्मतिंदर्शयित्वाप्रकरणविभागंदर्शयति। येतुज्ञाननिष्ठाइत्यादिना॥ अत्याश्रमिभ्यइतिउत्तमाश्रमिभ्यइत्यर्थः। साध्यसाधनभे
दोपमर्द्देनयदात्मैकत्वविज्ञानंयस्मिन्सर्वाणिभूतान्यात्मैवाभूदित्यवधारणेनोक्तंपूर्वार्द्धेनोत्तरार्द्धेनचसंसारनिवृत्तिफलकमुक्तमतन्नकेनचिद्मूढःसमुच्चिचीषति। ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई. अन्धन्तमइत्यादौतुसमुच्चिचीषयाविद्वदादिनिन्दादृश्यते। ततः किमित्यत आह। तत्रचयस्येति॥ कस्यतर्हिज्ञानस्यकर्म्मसमुच्चयः सम्भवतीत्यत आह। तदैवंवित्तमिति॥ तद्वो भा.
उ. क्तंभास्करेण। ईशावास्यमितिमन्त्रेब्रह्मविद्यायाः प्रक्रान्तत्वात्तस्याएवसमुच्चिचीषयानिन्दोच्यतइति। तदसत्। नहिप्रकृतमित्येतावतासम्बध्यते किन्तुसम्बन्धयोग्यम्। टी.
५ शुद्धब्रह्मात्मैकत्वविद्यायास्त्वध्यासोपमर्द्दकत्वान्नास्तिकर्म्मसम्बन्धयोग्यता। किन्त्वपस्मिन्निष्पन्नेऽपिफलस्यव्यवधानंसम्भाव्यते तस्यैवसहकारिसमुच्चयइष्यते। दर्श
नादेरिवैहैकत्वमनुपश्यतः कोमोहः कःशोकइत्येकत्वदर्शनसमकालंमोहादिनिवृत्यभिधानान्नकालान्तरीयफलम्। ततोनसहकारिसमुच्चिचीषा। किन्त्वास्यामन्त्रोपनि
षदोब्राह्मणाविविदिषन्तियज्ञेनेत्यादौतृतीयाश्रुत्यायज्ञादेरिष्यमाणवेदनकरणत्वेनसम्बन्धः प्रतीयते। तत्कथंदुर्वशेनप्रकरणेनसहकारिसम्बन्धः कल्प्यते। प्रधानस्यचवि
द्यायाः सहकारिसम्बन्धविधित्सयानिन्देत्यप्ययुक्तम्। अतएवाग्नीन्धनाद्यनपेक्षेतिसूत्रविरोधश्च समसमुच्चयश्चपरेणापिनेष्यते। विरोधेनचपरिजह्रे तस्मात्कर्म्माविरुद्धदे

अन्धन्तमःअदर्शनात्मकंतमः प्रविशन्ति। के। येऽविद्यांविद्यायाअन्याऽविद्यातांकर्म्मेत्यर्थः। कर्म्मणोविद्याविरोधित्वात्। तामविद्यामग्निहोत्रादिलक्षणा
मेवकेवलामुपासतेतत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततस्तस्माद्दन्धात्मकात्तमसोभूयइवबहुतरमेवतमः प्रविशन्ति। कर्म्महित्वायेउविद्या
यामेवदेवताज्ञानेरताः। तत्रावान्तरफलभेदविद्याकर्म्मणोः समुच्चयकारणमाह। अन्यथाफलवद्फलवतोः सन्निहितयोरङ्गाङ्गितयाजामितेवस्या

अन्धन्तमः प्रविशन्तियेऽविद्यामुपासते। ततोभूयइवतेतमोयउविद्यायांरताः॥९॥ अन्यदेवाहुर्विद्ययाऽन्यदेवाहुरविद्यया। इतिशु
श्रुमधीराणांयेनस्तद्विचचक्षिरे॥१०॥ विद्याञ्चाविद्याञ्चयस्तद्वेदोभयंसह। अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुते॥ ११ ॥ ॥

दित्यर्थः॥९॥ अन्यत्पृथगेवविद्यायाक्रियतेफलमित्याहुर्वदन्ति। अन्यदाहुरविद्ययाकर्म्मणाक्रियतइति। तथोक्तंकर्म्मणापितृलोकोविद्ययादेवलोकइति।
एवंशुश्रुमःश्रुतवन्तोवयंधीराणांधीमतांवचनम्। येआचार्य्यानोऽस्मभ्यंतत्कर्म्मचज्ञानञ्चविचचक्षिरेव्याख्यातवन्तस्तेषामयमागमःपारम्पर्यागतइत्यर्थः
॥१०॥ यतएवंविद्यांचाविद्यांचदेवताज्ञानंकर्मचेत्यर्थः। यस्तदेतदुभयंसहैकेनपुरुषेणानुष्ठेयंवेदतस्यैदंसमुच्चयकारिणएकपुरुषार्थसम्बंधःक्रमेणस्यादित्युच्यते।

वताज्ञानस्यैवसमुच्चयोविधीयते॥ ननुदेवताज्ञानस्यकर्म्मफलातिरिक्तफलाभावात्समुच्चयोनसम्भवतीत्यत आह। विद्ययेति॥ ननुसमुच्चिचीषयानिन्देतिकिमितिव्याख्याय
तेअध्ययनविधेर्मोक्षादर्वाक्पर्य्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वात्सहाणार्थैवनिन्दाकिंनेष्यतेतत्राह। तयोर्ज्ञानकर्म्मणोरिति॥ फलशब्दोमोक्षेरूढोमोक्षम
निच्छतामपिसमीहितेफलव्यवहारदर्शनात्ततोयोदेवलोकादिमुपादित्सतेतस्यतदपिफलंभवत्येवेत्यर्थः॥९॥ वित्तन्त्रामायापरमेश्वरस्योपाधिः। मायान्तुप्रकृतिंविद्यान्मा
यिनन्तुमहेश्वरमित्यादिश्रुत्यन्तरप्रसिद्धात्रासम्भूतिशब्देनोच्यतेनब्रह्म। तस्यनिर्विकारस्यसाक्षात्प्रकृतित्वानुपपत्तेः। भास्कराभिमतस्तुपरिणामवादस्तत्वालोकेनि राम.
रस्तएवास्माभिः सांसारिकदुःखानुभवाभावेनेचसुषुप्तिवत्प्रकृतिलयस्यपुरुषेणार्थ्यमानताऽप्युपपद्यते। फलञ्चकर्मोपासनद्वयप्रकृत्युपासनेऽपिपरमेश्वरएवदास्यति। ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽजडत्वात्प्रकृतेः फलदत्वानुपपत्तेरुपास्यत्वाऽनुपपत्तिरित्यपिकुचोद्यमेव॥१०॥११॥१२॥ विस्तरेणोक्तमर्थज्ञानं संक्षिप्योपसंहरति। मानुषदैववित्तसाध्यमित्यादिना॥ शरीरपातवंगो भूहिरण्यादिसाधनसम्पत्तीश्च मानुषंवित्तम्। दैवंवित्तम् देवताज्ञानमुत्तरग्रन्थस्यसम्बन्धाभिधित्सयार्थम्॥ विशेषमनुवदति। तत्रनिषेकादीति॥ तदुक्तमि

अविद्ययाकर्मणाऽग्निहोत्रादिनामृत्युंस्वाभाविकंकर्म्मज्ञानञ्च मृत्युशब्दवाच्यमुभयंतीर्त्वाअतिक्रम्यविद्ययादेवताज्ञानेनामृतंदेवतात्मभावम श्नुतेप्राप्नोति। तद्ध्यमृतमुच्यतेयद्देवतात्मगमनम्॥११॥अधुनाव्याकृताव्याकृतोपासनयोः समुच्चिचीषयाप्रत्येकंनिन्दोच्यते। अन्धन्तमःप्रविशन्तियेअसम्भूतिंसम्भवनंसम्भूतिःसायस्यकार्यस्यसासम्भूतिः तस्यान्याअसम्भूतिःप्रकृतिःकारणमव्याकृताख्यातामसम्भूतिमव्याकृताख्यां प्रकृतिकारणमविद्याकामकर्म्मबीजभूतामदर्शनात्मिकामुपासतेयेतेतदनुरूपमेवान्धतमोऽदर्शनात्मकंप्रविशन्ति॥ ततस्तस्मादपिभूयोबहुत रंतमःप्रविशन्तियेसम्भूत्यांकार्यब्रह्मणिहिरण्यगर्भाख्येरताः॥१२॥ अधुनोभयोरुपासनयोःसमुच्चयकारणमवयववफलभेदमाह। अन्यदेवपृथगेवाहुःफलंसम्भवात्सम्भूतेःकार्य्यब्रह्मोपासनादणिमाद्यैश्वर्य्यलक्षणमाख्यातवन्तइत्यर्थः। तथाचान्यदाहुरसम्भवादसम्भूतेरव्याकृताद व्याकृतोपासनाद्यदुक्तमन्धन्तमःप्रविशन्तीतिप्रकृतिलयइतिचपौराणिकैरुच्यतेइतिएवंशुश्रुमधीराणांयेनस्तद्विचचक्षिरेव्याकृताव्याकृतोपा

अन्धन्तमः प्रविशन्तियेऽसम्भूतिमुपासते। ततोभूयइवतेतमोयउसम्भूत्यांरताः॥१२॥ अन्यदेवाहुःसम्भवादन्यदाहुरसम्भवात्। इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे॥१३॥ सम्भूतिञ्चविनाशञ्चयस्तद्वेदोभयंसह। विनाशेनमृत्युंतीर्त्वासम्भूत्यामृतमश्नुते॥१४॥

सनफलंव्याख्यातवन्तइत्यर्थः॥१३॥यतएवमतःसमुच्चयःसम्भूत्युपासनयोर्युक्तएकपुरुषार्थत्वाच्चेत्याह। सम्भूतिंचविनाशञ्च। यस्तद्वेदोभयंसविनाशोधर्मोयस्यकार्य्यस्यसतेनधर्म्मिणाऽभेदेनोच्यते। विनाशइतितेनतदुपासनेनाऽनैश्वर्य्यमधर्म्मकामादिदोषजातञ्चमृत्युंतीर्त्वाहिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिःफलम्। तेनानैश्वर्य्यादिमृत्युमतीत्यासम्भूत्याअव्याकृतोपासनयाअमृतंप्रकृतिलयलक्षणमश्नुते। सम्भूतिञ्चविनाशञ्चेसत्रावर्णलोपेनविनिर्देशोद्रष्टव्यः। प्रकृतिलयफलंश्रुत्यनुरोधात्। मानुषदैववित्तसाध्यंफलंशास्त्रलक्षणंप्रकृतिलयान्तम्। एतावतीसंसारगतिः। अतःपरं पूर्वोक्तमात्मैवाऽभूद्विजानतइतिसर्वात्मभावएवसर्वैषणासन्न्यासज्ञाननिष्ठाफलंएवंद्विप्रकारःप्रवृत्ति निवृत्तिलक्षणोवेदार्थोऽत्रप्रकाशितः। तत्रप्रवृत्तिलक्षणस्यवेदार्थस्यविधिप्रतिषेधलक्षणस्यकृत्स्नस्यप्रकाशनेप्रवर्ग्यान्तंब्राह्मणमुपयुक्तम्। निवृत्तिलक्षणस्यप्रकाशनेऽतऊर्ध्वंबृहदारण्यकंतत्रनिषेकादिश्मशानान्तंकर्म्मकुर्वन्जिजीविषेत्योविद्ययासहापरब्रह्मविषयया। तदुक्तंविद्याञ्चाविद्याञ्चयस्तद्वेदोभयंसह॥१४॥

तिप्रत्युक्तमन्त्रेण॥ विद्याञ्चेत्याक्षिकामृतत्वंफलमित्युक्तमस्माभिरितियोजना। व्याहृत्यवयवइतितस्यभूरितिशिरोभुवइतिबाहूस्वरितिप्रतिष्ठेपादावित्यर्थः। मंत्रानुपदशोव्याख्यायसङ्क्षेपतोविचारमारभते।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई॰ अविद्ययामृत्युंतीर्त्वेत्यादिना॥ अमृतत्वञ्चेत्यमृतत्वञ्च मुख्यमेव कस्मान्न गृह्यत इति सम्बन्धः। शास्त्रीययोर्ज्ञानकर्म्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यौ न तर्कमात्रेणेति परे भा॰
उ॰ णोक्तम्। सिद्धान्तिशास्त्रसिद्ध एव विरोध इत्याह। दूरमेतद् इति॥ विषूचीनानागती विद्याऽविद्ये दूरं विपरीते। अतिशयेन विरुद्धे इत्यर्थः। सहसम्भवानुपपत्तेरिति कानुपपत्तिः। काठ टी॰
द॰ के विरोधश्रवणात्। तद्गतविद्याऽविद्ययोर्विरोधोऽस्तिहेत्वविरोधश्रवणाद् विरोधो भविष्यतीति न वाच्यं विरोधाविरोधयोः सिद्धत्वेन विकल्पसम्भवाद् उदितानुदितहोमयोर्हि पु

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्युक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते। तद्यत्तत्सत्यमसौ स आदित्य य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षि णेक्षन् पुरुष एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्म्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण। हिरण्मयं ज्योतिर्म यमित्येतत्। तेन पात्रेणेवापिधानभूतेन सत्यस्यादित्यमण्डलस्थस्य ब्रह्मणोऽपिहितं छादितं मुखं द्वारं तत्त्वं हे पूषन्नपावृणु सत्यधर्म्माय तव सत्यस्योपास नात् सत्यं धर्म्मो यस्य ममसोऽहं सत्यधर्म्मा तस्मै मह्यं अथवा यथाभूतस्य धर्म्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये॥१५॥ हे पूषन् जगतः पोषणात्पूषा रवि स्तथैक एव ऋषति गच्छतीत्येकर्षिः। हे एकर्षे। तथा सर्वस्य संयमनाद्यमः। हे यम। तथा रश्मीनां प्राणानां रसानां स्वीकरणात्सूर्यः। हे सूर्य। प्रजापतेरपत्यं प्राजा पत्यः। हे प्राजापत्य। व्यूह विगमय रश्मीन्स्वान्। समूह एकीकुरु उपसंहर ते तेजस्तापकं ज्योतिः। यत्ते तव रूपं कल्याणतममत्यन्तशोभनं तत्ते तवात्मनः प्र

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥१५॥ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह। तेजो
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि॥१६॥ वायुरनिलममृतमथेदं भस्मान्तं शरीरम्। ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर
कृतं स्मर॥१७॥

सादात्पश्यामि। किन्त्वहं न तु त्वां भृत्यवद्याचे योऽसावादित्यमण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात् पूर्णम्। अनेन प्राणबुद्ध्यात्मना जगत्समस्त मिति पुरुषः पुरि शयनाद्वा पुरुषः सोऽहमस्मि भवामि॥१६॥ अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिल ममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्। मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नौ हुतं भस्मान्तं भू यात्॥ ओमिति यथोपासनं ओं प्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो सङ्कल्पात्मक स्मर यन्मम स्मर्त्तव्यं तस्य कालोऽयं प्रत्युपस्थि तोऽतः स्मर एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म्म तच्च स्मर क्रतो स्मर। कृतं स्मरेति पुनर्वचनमादरार्थम्॥१७॥ ॥ ॥

मे रुषतन्त्रत्वाद्युक्तो विकल्प इत्युक्तं तर्ह्यविरोध एवास्तु समुच्चयविधिबलादिति चेन्न। मुख्यब्रह्मविद्याविद्ययोः शुक्तिविद्याविद्ययोरिव सहसम्भवानुपपत्तेः समुच्चयविधिरसि श्री
द्धः। सिद्धे समुच्चयविधौ तद्बलाद्विरोधसिद्धिरविरोधावगमाच्च समुच्चयसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः। सहसम्भवानुपपत्तावपि क्रमेणैकाश्रयविद्याविद्ये स्यातामिति राम
चेत् यदि पूर्वमविद्या पश्चात्तु विद्येति क्रमस्तर्हीष्यत एव यदि पश्चात्तर्ह्यसम्भव इत्याह। न विद्योत्पत्ताविति॥ पूर्वसिद्धाया अविद्यायाः प्रध्वस्तत्वादन्यस्याश्चोत्पत्तौ कारणासंभवा ६
न्मूलाभावेन भ्रमसंशयाग्रहणानामपि विदुषोऽनुपपत्तिरित्यर्थः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्योत्पत्तौ माभूदविद्याकामकर्म्मतु भविष्यति विदुषोऽपि न्याय्यान भिक्षाटनादिदर्शनादित्याशङ्क्याह। अविद्यासम्भवादिति॥ चोदनाप्रयुक्तानुष्ठानं हि कर्म्म ज्ञानेन सह तत्व समु
च्चिचीषितं ब्रह्मात्मैकत्वं साक्षादनुभवतो न चोदना सम्भवति कामाभावात् कामिनो हि सर्व्वाश्चोदनाः। अकामतः क्रियाः काश्चिद्दृश्यन्तेन हि कस्यचित्। यद्यद्धि कुरुते जन्तुस्तत्तत्काम
स्य चेष्टितमिति स्मरणात्। विद्वच्छरीरस्थितिस्त्वविद्यालेशाश्रया। कर्म्मशेषनिमित्तं तु विदुषो भिक्षाटनादिन कर्म्मचोदनाभावात्किन्तु यावत्प्राणशरीरसंयोगभावितकर्माभासं त
च्च विद्वान्न स्वगतं मन्यते कर्म्माध्यासोपादानाविद्याया असम्भावान्नैव किञ्चित्करोमीति मन्यमानाच्चेति भावः। यदुक्तममृतशब्देन मुख्यमेवामृतत्वं किं न गृह्यते। विद्याशब्देन

पुनरन्येन मन्त्रेण मार्गं याचते। हे अग्ने नय गमय सुपथा शोभनेन मार्गेण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतल
क्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफलोपभोगायेत्यर्थः। अस्मान्यथोक्तधर्म्मफलविशिष्टान् विश्वानि सर्व्वा
णि हे देव वयुनानि कर्म्माणि प्रज्ञानानि वा विद्वान् जानन्। किञ्च युयोधि वियोजय विनाशय अस्मदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम्। ततो वयं विशु
द्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्त्तुं भूयिष्ठां बहुतराम्। ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारेण प
रिचरेमेत्यर्थः। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते। विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुत इति श्रुत्वा केचित्सं
शयं कुर्वन्ति अतस्तन्निर्धारणार्थं सङ्क्षेपतो विचारणां करिष्यामः। तत्र तावत्किंनिमित्तः संशय इत्युच्यते। विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृ
तत्वं च। ननूक्तायाः परमात्मविद्यायाः कर्म्मणश्च विरोधात्समुच्चयानुपपत्तिः। सत्यम्। विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्। यथाऽविद्यानुष्ठानं वि ध

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥१८॥ इति वाजसनेयसंहितोपनिषत्संपूर्णा

द्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाऽविरोधावपि। यथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यतेऽध्वरेऽपि हिंसा स्यादिति। एवं विद्या वि
विद्ययोरपि स्यात्। विद्याकर्मणोश्च समुच्चयेन। दूरमेते विपरीते विषूची अविद्या या च विद्येति श्रुतेः। विद्यां चाविद्यां चेति वचनादविरोध इति चेन्न। हेतुस्वरूपफलविरोधा
त्। विद्याविद्याविरोधाविरोधयोर्विकल्पासंभवात् समुच्चयविरोध एवेति चेन्न। सहसंभवानुपपत्तेः। क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न। विद्योत्पत्तौ तदाश्रयेऽविद्यानुपपत्तेः। न ह्य एकाश्रये
१ समुच्चय विधानी
ग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा। यस्मिन् सर्वाणि भूतानि
आत्मैवाऽभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसंभवश्रुतेः। अविद्यासंभवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम। अमृतमश्नुत इ
त्यापेक्षिकममृतं विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेत्यादिना द्वारमार्गयाचनमनुपपन्नं स्यात्तस्माद्यथाऽस्माभिर्व्याख्यात एव मन्त्राणामर्थ इत्युपरम्यते।
॥१८॥ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतः कृतौ वाजसनेयसंहितोपनिषद्भाष्यं सम्पूर्णम्॥ ओं तत्सत्॥१

च परमात्मविद्येति तत्राह। अमृतमिति॥ मुख्यामृतत्वग्रहणे हिरण्मयादिमन्त्रेण द्वारमार्गयाचनमनुपपन्नं स्यात्तस्य न प्राणा उत्क्रामन्त्यत्र ब्रह्म समश्नुत इत्यादिश्रुतेः। ततो मुख्या
र्थबाधाद्गौणार्थग्रहणं युक्तमित्यर्थः। यस्मादर्थान्तरं न सङ्गच्छते तस्मादित्युपसंहारः॥१३॥१४॥१५॥१६॥१७॥१८॥ ईशाप्रभृतिभाष्यस्य शाङ्करस्य परात्मनः। मन्त्रोपनिषदि सिद्धा
र्थं प्रणीतं टिप्पणं स्फुटम्॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दभगवत्पूज्यपादशिष्यभगवदानन्दज्ञानकृता वाजसनेयसंहितोपनिषद्भाष्यटीका समाप्ता॥ ओं तत्सत्॥

अविद्यायाह्यसत्वात् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ वाराणशीप्रसादस्यनियोगेनतुयत्नतः॥काशीसंस्कृतमुद्रायामङ्कितोयंशिलाक्षरैः॥१॥श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथ

॥इतिसटीकईशावास्योपनिषद्भाष्यंसम्पूर्णम्॥

जीकेपासश्रीयुतमहाराजशिवलालदुबेजीकेमकानमेंयहपुस्तकमिलेगाअथवाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगा संवत् १९२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=29.02.20 11:52
,TRANSFERRED=2020/02/29 at 11:56:01
,PAGES=14
,TYPE=STD
,NAME=S0002921
,Book Name=M-2870-SATIK ESHAVSYO PANISHBHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection